**CLASS : 12th (Sr. Secondary)** **Code No. 4905**

**Series : SS-M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय :* **3** *घण्टे ]* *[ पूर्णांक :* **80**

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* **8** *तथा प्रश्न* **15** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः* –

(i) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(ii) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

(iii) *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

मतभेदस्य अभावः एकता इति उच्यते। मनुष्याणां सांसारिक-जीवनस्य कृते एकता महान् लाभकारी गुणः अस्ति। यदि संसारे मनुष्येषु एकता न स्यात् तर्हि तेषां एकदिनस्यापि जीवनं कठिनं सम्पद्येत। यत् कार्यं एकेन न कर्तुं शक्यते तद् बहूनां सम्मिलितेन समुदायेन सुगमतया एव भवति। वर्तमानसमये एकतायाः महान् अभावः अस्ति। एतस्य प्रधानं कारणं तु स्वार्थपरता एव अस्ति। सर्वे स्वकीयमेव हितं पश्यन्ति न अन्येषाम्। अतः एकतायाः स्थापनाय स्नेह-सौहार्द-वर्धनाय स्वार्थसाधनेन सहैव परेषामपि स्वार्थरक्षणाय अवधानं परमावश्यकं वर्तते।

*प्रश्नाः* – $2 \times 5 = 10$

(क) कस्य अभावः एकता इति उच्यते ?

(ख) यदि मनुष्येषु एकता न स्यात् तर्हि किं स्यात् ?

(ग) एकतायाः अभावस्य प्रधानं कारणं किमस्ति ?

(घ) एकतायाः स्थापनाय किमावश्यकं वर्तते ?

(ङ) सांसारिकजीवनस्य कृते लाभकारी गुणः कोऽस्ति ?



Downloaded from www.cclchapter.com

**खण्डः 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** *विषयमेकमधिकृत्य* लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) संस्कृतस्य महत्त्वम्।

(ख) अनुशासनम्।

(ग) प्रातःकालीनभ्रमणम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां महात्म्यम्-एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुर"बलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।

**अथवा**

(ख) श्रीनायारस्य दायित्वग्रहणस्य एकमासाभ्यन्तरे बहुदिनेभ्यः स्थगितानां विविधसमस्यानामपि समाधानं जातम्। स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः। सः प्रतिमासं प्रथमदिवसे स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म। तेनानुमीयते तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः।



Downloaded from www.cclchapter.com

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तं भूपतिर्भासुरहेमराशिं

लब्धं कुबेरादभियास्यमानात्।

दिदेश कौत्साय समस्तमेव

पादं सुमेरोरिव वज्रभिन्नम्।।

**अथवा**

(ख) अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।

रमते न मरालस्य मानसं मानसं विना।

**5.** अधोलिखितासु सूक्तिषु मात्र***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) मा गृधः कस्यस्विद्धनम्।

(ख) सुलभसौख्यमिदानीं बालत्वं भवति।

(ग) नाशयति च पुरुषमत्यासङ्गो विषयेषु।

(घ) मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) कीदृशे मनसि उपदेशगुणाः विशन्ति ?

(ख) गुरूपदेशः कम् हरति ?



Downloaded from www.cclchapter.com

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखितव्यानि –

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) लोकः कम् अनुवर्तते ?

(ख) 'कुरुते' इत्यत्र कः धातुः ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) अत्रैव <u>परोपकारविचाराणाम्</u> इतिश्रीरभूत्।

(ख) तच्छ्रुत्वा <u>राजा</u> तूष्णीमासीत्।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य-परिचयः)**

**9.** महाकविबाणभट्टस्य ***अथवा*** महाकवेः भवभूतेः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) रघुवंशस्य

(ii) श्रीमद्भगवद्गीता।



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र ***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(क) इन्द्रवज्रा

(ख) शिखरिणी

(ग) मालिनी

(घ) वंशस्थः

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(क) अन्योक्तिः

(ख) श्लेषः

(ग) अनुप्रासः

(घ) उपमा

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) 'यणसन्धेः' ***अथवा*** 'गुणसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) 'अपादानकारकस्य' ***अथवा*** 'कर्ताकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) 'अव्ययीभावसमासस्य' ***अथवा*** 'द्विगुसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



Downloaded from www.cclchapter.com

## खण्डः 'छ'

## [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'तस्यौदार्यम्' इति पदे कः सन्धिविच्छेदः ?

(i) तस्य + उदार्यम् (ii) तस्य + औदार्यम्

(iii) तस्य + दार्यम् (iv) तस्यौ + दार्यम्

(ख) 'हि + एवम्' इति पदे किं सन्धिपदम् ?

(i) ह्येवम् (ii) ह्यवम्

(iii) हैवम् (iv) ह्यैवम्

(ग) 'नोपसर्पति' इति पदे कः सन्धिः ?

(i) यण्सन्धिः (ii) अयादिसन्धिः

(iii) दीर्घसन्धिः (iv) गुणसन्धिः

(घ) 'पशुसमाम्नायः' इति पदे विग्रहोऽस्ति ?

(i) पशून् समाम्नायः (ii) पशूनां समाम्नायः

(iii) पशवः समाम्नायः (iv) पशुः समाम्नायः

(ङ) 'दीर्घग्रीवः' इति पदे कः समासः ?

(i) अव्ययीभावः (ii) द्वन्द्वः

(iii) तत्पुरुषः (iv) बहुव्रीहिः



Downloaded from www.cclchapter.com

(च) 'यौवनात् प्रभवम्' इति विग्रहे किं समस्तपदम् ?

(i) यौवनप्रभवम् (ii) यौवनात्प्रभवम्

(iii) यौवनप्रभः (iv) यौवनप्रभवाः

**15.** लघूत्तरात्मक प्रश्नाः — $10 \times 1 = 10$

(i) 'किम्' नपुंसकलिंगे प्रथमा बहुवचने रूपं किम् ?

(ii) 'विद्यया' इति पदे का विभक्तिः ?

(iii) 'शुश्रुम' इति पदे कः धातुः ?

(iv) 'प्राप्नोति' इति पदे कः पुरुषः ?

(v) 'त्यक्तुम्' इति पदे कः प्रत्ययः ?

(vi) 'कृ + शतृ' अनयोः संयोगे किं रूपम् ?

(vii) 'सह' इति उपपदयोगे का विभक्तिः ?

(viii) 'निकृष्टः' इति पदस्य विलोमपदं किम् ?

(ix) 'सुकृतम्' इति पदस्य विलोमपदं लिखत।

(x) 'वित्तम्' इति पदस्य पर्यायवाचिपदं किम् ?



Downloaded from www.cclchapter.com

**CLASS : 12th (Sr. Secondary)** **Code No. 4905**

**Series : SS-M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : B***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः –*

*(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'

## (अपठित-अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

भारतस्य एका भयावहा समस्या अस्ति - प्रदूषणम्। प्रदूषणनिवारणाय वृक्षारोपणम् अत्यावश्यकमस्ति। वृक्षाः अस्माकं कृते स्वयं कुसुमपत्रफलानां भारं वहन्ति तथा सर्वं अन्येभ्यः यच्छन्ति। स्वयं आतपे तिष्ठन्ति, अन्यस्य छायां कुर्वन्ति। वृक्षाणां मूलं, वल्कलं, पत्रं, पुष्पं, फलं सर्वमेव परेभ्यः अस्ति। एतादृशाः परोपकारिणः वृक्षाः जनेभ्यः किमपि न वा_छन्ति। किन्तु आधुनिके युगे जनाः स्वार्थिनः अभवन्। स्वसुखाय गृहनिर्माणाय ते वृक्षान् छिन्दन्ति। ते किं न जानन्ति यत् वृक्षाः सृष्टेः आधाराः सन्ति। वृक्षाभावे सृष्टिः असम्भवा खलु।

*प्रश्नाः* –     2 × 5 = 10

(क) भारतस्य भयावहा समस्या का ?

(ख) किमर्थं वृक्षारोपणम् आवश्यकमस्ति ?

(ग) के अन्यस्य छायां कुर्वन्ति ?

(घ) वृक्षाणां किं किं परेभ्यः अस्ति ?

(ङ) कस्याभावे सृष्टिः असम्भवा अस्ति ?



Downloaded from www.cclchapter.com

**खण्डः 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) स्वच्छतायाः महत्त्वम्।

(ख) अनुशासनम्।

(ग) मम विद्यालयः।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। न ह्येवंविधमपरिचितमिह जगति कि_चदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। परिपालितापि प्रपलायते।

**अथवा**

(ख) अस्य किन्तोः कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटास्ति। बहून् वारान् दृष्टवानस्यि यत्कार्यं सर्वथा सज्जं सम्पद्यते, सर्वप्रकारैः सिद्धिर्हस्तगता भवति, यथैव सफलतायाः मूर्तिः सम्मुखमागच्छन्ती विलोक्यते तथैव क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं विनाशयति।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तथेति तस्यावितथं प्रतीतः

प्रत्यग्रहीत्स"रमग्रजन्मा।

गामात्तसारां रघुरप्यवेक्ष्य

निष्क्रष्टुमर्थं चकमे कुबेरात्।।



Downloaded from www.cclchapter.com

**अथवा**

(ख) सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम्।

वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

**5.** अधोलिखितासु सूक्तिषु मात्र***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) कुर्वन्नेव हि कर्माणि जिजीविषेच्छतं समाः।

(ख) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ग) सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः।

(घ) अस्माभिः पर्वताः शंकवः कृताः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

अथ अकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्, क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्डमण्डित-दिगन्त-दन्तावल-भयानका-कारा ततः पारस्परिक-संश्लेष-विहित-महान्धकारा च समस्तं गगनतलं पर्यच्छदीत्।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) मेघमाला का इव प्रादुरभूत् ?

(ख) का समस्तं गगनतलं पर्यच्छदीत् ?



Downloaded from www.cclchapter.com

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखितव्यानि –

पश्चात्पुच्छं वहति विपुलं तच्चधूनोत्यजœeम्
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति, प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) कस्य चत्वारः खुराः आसन् ?

(ख) कः शष्पाणि अस्ति ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) तस्मै राज्ञे <u>व्ययार्थं</u> रत्नचतुष्टयं दास्यामि।

(ख) केवलं <u>यीशोः</u> समीपे गमनात्पूर्वं तव दर्शनमिच्छामि।

## खण्डः 'घ'

## (संस्कृतसाहित्यस्य-परिचयः)

**9.** महाकविकालिदासस्य ***अथवा*** भट्टमथुरानाथशास्त्रिणः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) कादम्बरी,

(ii) प्रबन्धम_जरी



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(क) अनुष्टुप्
(ख) मालिनी
(ग) शिखरिणी
(घ) शार्दूलविक्रीडितम्

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(क) उपमा
(ख) उत्प्रेक्षा
(ग) व्याजस्तुतिः
(घ) अर्थान्तरन्यासः

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) 'गुणसन्धेः' ***अथवा*** 'अयादिसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) 'करणकारकस्य' ***अथवा*** 'सम्प्रदानकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) 'द्विगुसमासस्य' ***अथवा*** 'द्वन्द्वसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



Downloaded from www.cclchapter.com

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'तमसाऽऽवृताः' इति पदे कः सन्धिविच्छेदः ?

(i) तमस् + आवृताः (ii) तमसा + आवृताः

(iii) तमसः + आवृताः (iv) तमसाः + आवृताः

(ख) 'अश्वः + अश्वः' इति पदे किं सन्धिपदम् ?

(i) अश्वोऽश्वः (ii) अश्वाश्वः

(iii) अश्वश्वः (iv) अश्वऽश्वः

(ग) 'वेदोभयम्' इति पदे कः सन्धिः ?

(i) दीर्घसन्धिः (ii) वृद्धिसन्धिः

(iii) गुणसन्धिः (iv) यण्सन्धिः

(घ) 'कुलललनाः' इति पदे विग्रहोऽस्ति ?

(i) कुलात् ललनाः (ii) कुलं ललनाः

(iii) कुलेन ललनाः (iv) कुलस्य ललनाः

(ङ) 'शान्तिसुखम्' इति पदे कः समासः ?

(i) द्विगुसमासः (ii) द्वन्द्वसमासः

(iii) तत्पुरुषसमासः (iv) बहुव्रीहिसमासः



Downloaded from www.cclchapter.com

(च) 'पदयोः निक्षेपः' इति विग्रहे किं समस्तपदम् ?

(i) पदक्षेपः (ii) पदनिक्षेपः

(iii) पद्योक्षेपः (iv) पदोक्षपः

**15.** लघूत्तरात्मक प्रश्नाः – $10 \times 1 = 10$

(i) 'तत्' नपुंसकलिंगे, प्रथमा बहुवचने रूपं किम् ?

(ii) 'सर्वेषाम्' इति पदे का विभक्तिः ?

(iii) 'उपविश्य' इति पदे कः धातुः ?

(iv) 'गणयति' इति पदे कः पुरुषः ?

(v) 'ईप्सितम्' इति पदे कः प्रत्ययः ?

(vi) 'दा + तव्यत्' एतयोः संयोगे किं रूपम् ?

(vii) 'नमः' इति योगे का विभक्तिः ?

(viii) 'आशा' इति पदस्य विलोमपदं किमस्ति ?

(ix) 'पर्वताः' इति पदस्य पर्यायवाचिपदं किमस्ति।

(x) 'अरिः' इति पदस्य समानार्थकं किमस्ति ?



Downloaded from www.cclchapter.com

**CLASS : 12th (Sr. Secondary)** **Code No. 4905**

**Series : SS-M/2020**

रोल नं० ☐☐☐☐☐☐☐☐☐☐ **SET : C**

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh/Re-appear Candidates)

*समय :* **3** *घण्टे ]* *[ पूर्णांक :* **80**

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* **8** *तथा प्रश्न* **15** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः ‘क’**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

पूर्वं भारते वर्षे कपिलवस्तुनगरे महात्मा बुद्धः प्रादुर्बभूव। तस्य पिता राजा शुद्धोदनः आसीत् तथा च मातुः नाम मायादेवी आसीत्। शैशवादेव सः गंभीरः विरक्तमनः आसीत्। भौतिकपदार्थेषु विलासोपकरणेषु तस्य मनः न रमते स्म। तस्य विवाहः यशोधरा नाम कन्यया सह अभवत्। तयोः राहुलः नामकः पुत्रः अजायत। किन्तु तस्य मनः राज्यकार्येषु न अरमत। एकदा तेन मार्गे एकः वृद्धः एको रोगग्रस्तः तथा मृतः पुरुषश्च दृष्टः तस्मात् सः अतिविरक्तो जातः। तेन गृह-त्यागस्य संकल्पोऽपि कृतः। गृहं त्यक्त्वा श्रमणवेशं धारयित्वा स्थानात् स्थानं भ्रमन् बोधगयामगच्छत्। तत्र षट्वर्षाणि तपस्तेपे। तत्रैव वटमूले सः महाबोधं प्राप्तवान्। ततः सः बुद्ध इति नाम्ना विख्यातः जातः।

*प्रश्नाः* –  $2 \times 5 = 10$

(क) महात्मा बुद्धः कुत्र प्रादुर्बभूव ?

(ख) तस्य मातुः पितुः किं नाम आसीत् ?

(ग) तस्य मनः केषु न रमते स्म ?

(घ) सः मार्गे कान् दृष्ट्वा विरक्तो जातः ?

(ङ) सः कति वर्षाणि तपस्तेपे ?



Downloaded from www.cclchapter.com

**खण्डः 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) प्रातःकालीन-भ्रमणम्।

(ख) समयस्य सदुपयोगः।

(ग) संस्कृतस्य महत्त्वम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिल-मलप्रक्षालनक्षमम् अजलं स्नानम्।

**अथवा**

(ख) श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरणेन आगत्य ओडिशासर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति। तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तदन्यतस्तावदनन्यकार्यो
गुर्वर्थमाहर्तुमहं यतिष्ये।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं
शरद्घनं नार्दति चातकोऽपि।।



Downloaded from www.cclchapter.com

**अथवा**

(ख) विपदि धैर्यमथाभ्युदये क्षमा

सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरुचिर्व्यसनं श्रुतौ

प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**5.** अधोलिखितासु सूक्तिषु मात्र***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।

(ख) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

(ग) मनुष्याणां हिंसावृत्तिस्तु निरवधिः।

(घ) वृक्षाः लेखनी भवेयुः समुद्रोऽपि मसी भवेत्, परं भगवद्वाक्यानि समाप्तानि न भवन्ति।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

क्षणे क्षणे हयस्य खुराश्चिक्कण-पाषाण-खण्डेषु प्रस्खलन्ति। पदे पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाघ्नन्ति, परं दृढसंकल्पोऽयं सादी न स्वकार्याद् विरमति।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) पाषाण-खण्डेषु के प्रस्खलन्ति ?

(ख) कः स्वकार्याद् न विरमति ?



Downloaded from www.cclchapter.com

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखितव्यानि –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

***प्रश्नाः*** –      $2 \times 1 = 2$

(क) कः सुकृतदुष्कृते उभे जहाति ?

(ख) 'कर्मसु' इति पदे का विभक्तिः ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -      $2 \times 1 = 2$

(क) कुत्रचित् सोऽयं किन्तुः नितान्तम<u>नुतापं</u> जनयति।

(ख) सुलभसौख्यमिदानीं <u>बालत्वं</u> भवति।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य-परिचयः)**

**9.** पं० हृषीकेशभट्टाचार्यस्य ***अथवा*** पं० अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः।      4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः –      4

(i) समुद्रस"मः,

(ii) श्रीमद्भगवद्गीता।



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र ***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत — 2 × 4 = 8

(क) इन्द्रवज्रा (ख) शिखरिणी

(ग) मन्दाक्रान्ता (घ) अनुष्टुप्

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत — 2 × 4 = 8

(क) अनुप्रासः (ख) उपमा

(ग) श्लेषः (घ) अन्योक्तिः

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) 'दीर्घसन्धेः' ***अथवा*** 'विसर्गसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) 'कर्ताकारकस्य' ***अथवा*** 'अधिकरणकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) 'तत्पुरुषसमासस्य' ***अथवा*** 'बहुव्रीहिसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



Downloaded from www.cclchapter.com

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'सर्वाण्येव' इति पदे कः सन्धिविच्छेदः ?

(i) सर्व + एव (ii) सर्वा + येव

(iii) सर्वाणि + एव (iv) सर्वाणि + इव

(ख) 'त्वयि + एवम्' इति पदे किं सन्धिपदम् ?

(i) त्वय्येवम् (ii) त्वयेवम्

(iii) त्वयैवम् (iv) त्वय्यवम्

(ग) 'एवातिगहनम्' इति पदे का सन्धिः ?

(i) यण्सन्धिः (ii) गुणसन्धिः

(iii) दीर्घसन्धिः (iv) अयादिसन्धिः

(घ) 'प्रकृतिसिद्धम्' इति पदे विग्रहोऽस्ति ?

(i) प्रकृत्या सिद्धम् (ii) प्रकृतौ सिद्धम्

(iii) प्रकृतिभ्यः सिद्धम् (iv) प्रकृतिः सिद्धम्

(ङ) 'दीर्घः अवकाशः तम्' इति विग्रहे किं समस्तपदम् ?

(i) दीर्घावकाशः (ii) दीर्घावकाशम्

(iii) दीर्घावकाशी (iv) दीर्घावकाशे



Downloaded from www.cclchapter.com

(च) 'हिंसानिरताः' इत्यत्र कः समासः ?

(i) द्विगुः (ii) द्वन्द्वः

(iii) तत्पुरुषः (iv) अव्ययीभावः

**15.** लघूत्तरात्मक प्रश्नाः – $10 \times 1 = 10$

(i) 'तद्' पुल्लि", प्रथमा, बहुवचने रूपम् किम् ?

(ii) 'तेषाम्' इति पदे का विभक्तिः ?

(iii) 'आक्रीडनम्' इति पदे कः धातुः ?

(iv) 'अपश्यम्' इति पदे कः पुरुषः ?

(v) 'निवर्तमानः' इति पदे कः प्रत्ययः ?

(vi) 'गम् + क्तः' एतयोः संयोगे किं रूपम् ?

(vii) 'बहिः' इति योगे का विभक्तिः ?

(viii) 'पृथिवी' इति पदस्य समानार्थकं किमस्ति ?

(ix) 'स्वर्गः' इति पदस्य विलोमपदं किमस्ति ?

(x) 'कमलम्' इति पदस्य पर्यायवाचिपदं किमस्ति ?



Downloaded from www.cclchapter.com

CLASS : 12th (Sr. Secondary) **Code No. 4905**

**Series : SS-M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : D***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

1. अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

विश्वेऽस्मिन् सुभाषचन्द्रबोसस्य नाम को न जानाति। सः क्रान्तिकारी नेता आसीत्। अस्य जन्म ब"प्रान्ते 1897 तमे जनवरीमासस्य 23 तारिकायाम् अभवत्। अस्य पिता जानकीनाथबोसः आसीत्। बाल्यकालादेव सः बुद्धिमान् धीरः साहसयुक्तः च आसीत्। सः कालिकाता-नगर्यां शिक्षां प्राप्तवान्। सः असहयोगआंदोलने संलग्नः अभवत्। सः स्वतन्त्रतायै सदा प्रयास-रतः आसीत्। सः शठे शाठ्यं समाचरेत् इति नीतिमनुसरितवान्। 'आजाद-हिन्द-फौज' इत्याख्यां सेनां संघटितवान्। सः देशे हिन्दू-मुस्लिमयोः एकतायाः कृते 'फारवर्ड ब्लाक' इत्यस्य स्थापनां कृतवान्। जर्मनी-आकाशवाण्या केन्द्रात् भारतीयजनेभ्यः स्वाधीनतायाः सन्देशः दत्तवान्। सः आह्वानम् अकरोत् - यूयं मह्यं रक्तमर्पयत अहं युष्मभ्यं स्वातन्त्र्यं दास्यामि। सः भारतमातुः वीरसपूतः भारतीय-जनानां च प्रेरणाœeोतः आसीत्।

*प्रश्नाः* – $2 \times 5 = 10$

(क) सुभाषचन्द्रबोसस्य जन्म कदा अभवत् ?

(ख) सः कुत्र शिक्षां प्राप्तवान् ?



Downloaded from www.cclchapter.com

(ग) तस्य का नीतिरासीत् ?

(घ) हिन्दू-मुस्लिमयोः एकतायाः कृते सः कस्य स्थापनां कृतवान् ?

(ङ) सः किम् आ£ानम् अकरोत् ?

**खण्डः 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) अनुशासनम्।

(ख) मम विद्यालयः।

(ग) स्वच्छतायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति। जात ! पश्यामि ते मुखपुण्डरीकम्।

**अथवा**

(ख) प्रथमं त्वया निर्मितोऽनाथाश्रमोऽधुना महाद्रुमेण परिणतः। अधुनात्र शताधिका अनाथशिशवो लालिताः पालिताश्च भवन्ति। तव हस्तयोस्तव अनाथाश्रमं समर्प्य अहं सौप्रस्थानिकीमिच्छामि।



Downloaded from www.cclchapter.com

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) सर्वत्र नो वार्तमवेहि राजन् !
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिœeा।।

**अथवा**

(ख) पापान्निवारयति-योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटी करोति।
आपद्गतं च न जहाति ददाति काले,
संमित्र लक्षणमिदं प्रवदन्ति सन्तः।।

**5.** अधोलिखितासु सूक्तिषु मात्र***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

(ख) योगः कर्मसु कौशलम्।

(ग) यो जन्म दत्तवान् स जीवितुमधिकारमपि दत्तवान्।

(घ) कार्यं वा साधयेयं देहं वा पातयेयम्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां महात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुर"बलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) द्वितीयरत्नेन अमृततुल्यं किमुत्पद्यते ?

(ख) एकं रत्नं किं ददाति ?



Downloaded from www.cclchapter.com

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखितव्यानि –

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) अकर्मणः किं ज्यायः ?

(ख) 'कुरु' इत्यत्र कः धातुः ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) पशुहत्या तु तेषाम् आक्रीडनम्।

(ख) नाशयति च पुरुषमत्यास"ì विषयेषु।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य-परिचयः)**

**9.** श्रीचन्द्रशेखरवर्मणः ***अथवा*** महाकविबाणभट्टस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) उत्तररामचरितम् ,

(ii) प्रबन्धपारिजातः।



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – $2 \times 4 = 8$

(क) अनुष्टुप्

(ख) वसन्ततिलका

(ग) वंशस्थः

(घ) शार्दूलविक्रीडितम्

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – $2 \times 4 = 8$

(क) अनुप्रासः

(ख) उत्प्रेक्षा

(ग) अर्थान्तरन्यासः

(घ) व्याजस्तुतिः

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) 'यण्सन्धेः' ***अथवा*** 'वृद्धिसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) 'कर्मकारकस्य' ***अथवा*** 'सम्प्रदानकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) 'द्वन्द्वसमासस्य' ***अथवा*** 'अव्ययीभावसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



Downloaded from www.cclchapter.com

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'शिखराच्छिखराणि' इति पदे कः सन्धिविच्छेदः ?

(i) शिखराः + शिखराणि

(ii) शिखरः + शिखराणि

(iii) शिखरात् + छिखराणि

(iv) शिखरात् + शिखराणि

(ख) 'भार्यया + उक्तम्' इति पदे किं सन्धिपदम् ?

(i) भार्ययोक्तम् (ii) भार्योक्तम्

(iii) भार्युक्तम् (iv) भारोक्तम्

(ग) 'गर्भेश्वरत्वम्' इति पदे का सन्धिः ?

(i) यण्सन्धिः (ii) गुणसन्धिः

(iii) अयादिसन्धिः (iv) दीर्घसन्धिः

(घ) 'लोकसंग्रहम्' इति पदे विग्रहोऽस्ति ?

(i) लोकस्य संग्रहम् (ii) लोकाय संग्रहम्

(iii) लोकम् संग्रहम् (iv) लोके संग्रहम्

(ङ) 'कृता प्रतिज्ञा येन सः' इति विग्रहे किं समस्तपदम् ?

(i) कृतप्रतिज्ञम् (ii) कृतप्रतिज्ञः

(iii) कृतप्रतिज्ञेन (iv) कृतप्रतिज्ञा



Downloaded from www.cclchapter.com

(च) 'बुद्धियुक्तः' इति अत्र कः समासः ?

(i) कर्मधारयः (ii) द्विगुः

(iii) बहुव्रीहिः (iv) तत्पुरुषः

**15.** लघूत्तरात्मक प्रश्नाः – $10 \times 1 = 10$

(i) 'युष्मद्' प्रथमा, एकवचने रूपम् किम् ?

(ii) 'चतुर्णाम्' इति पदे का विभक्तिः ?

(iii) 'उवाच' इति पदे कः धातुः ?

(iv) 'तिष्ठसि' इति पदे कः पुरुषः ?

(v) 'प्रदेयम्' इति पदे कः प्रत्ययः ?

(vi) 'नि + कृष् + क्तः' एतेषां संयोगे किं रूपम् ?

(vii) 'सह' इति योगे का विभक्तिः ?

(viii) 'नीरजम्' इति पदस्य समानार्थकं किमस्ति ?

(ix) 'सुखम्' इति पदस्य विलोमपदं किमस्ति ?

(x) 'स्वर्गः' इति पदस्य पर्यायवाचिपदं किमस्ति ?



Downloaded from www.cclchapter.com